International Journal of Sanskrit Research 2018; 4(2): 57-61

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(2): 57-61
© 2018 IJSR
www.anantaajournal.com
Received: 16-01-2018
Accepted: 26-02-2018

**Dr. Giridhari Panda**
Assistant Professor,
Department of Sanskrit,
Midnapore College (Autonomous)
Midnapore, West Bengal, India

**Correspondence**
**Dr. Giridhari Panda**
Assistant Professor,
Department of Sanskrit,
Midnapore College (Autonomous)
Midnapore, West Bengal, India

# भूषणसारदिशा शक्तिस्वरूपविचारः

**Dr. Giridhari Panda**

## सारांश

"शाब्दबोधं प्रति शक्तिग्रहमेव कारणम्" इति धिया शब्दस्य शक्तिः सर्वैः शास्त्रकारैः स्वीक्रियते। गृहीतशक्तिकात् पदात् शाब्दबोधस्य दर्शनात् अगृहीतशक्तिकात् पदात् शाब्दवोधस्यादर्शनात् शाब्दबोधं प्रति शक्तिग्रहस्य कारणता स्वीक्रियते । येन 'गुड' इत्युक्ते गुडपदेन मधुरत्वस्य प्रतीतिर्न भवति । तस्याः शक्तेः आश्रयरूपेण स्फोटरूपं शब्दमेवामनन्ति वैयाकरणाः । शाब्दवोधः कारणत्वेन अपेक्षिता एषा वृत्तिः शक्तिः लक्षणा व्यञ्जना' चेति भावेन त्रिधा विभज्यते । तत्र 'शक्ति इति कः पदार्थ' इति विवेचनावसरे शास्त्रकारेषु वैमत्यं परितक्ष्यते । मुख्यतः विषयेऽस्मिन् वैयाकरण-नैयायिकयोः विवादः समधिकः । प्राचीननैयायिकाईश्वरेच्छारूपा :ं शक्तिं स्वीकुर्वन्ति । नव्यनैयायिकाः केवलमिच्छामेव शक्तिरिति प्रतिपादयन्ति। तत्रापि वैयाकरणेषु भिन्नं मतं परिलक्ष्यते। वैयाकरणाः शक्तेः आश्रयरूपेण स्फोटरूपं शब्दमेवामनन्ति । नागेशः पदपदार्थयोः सम्बन्धान्तरमेव शक्तिरिति निरूपयति । भर्तृहरिरपि पदपदार्थयोः तादात्मरूपसम्बन्ध एव शक्तिः इति स्वीकरोति । तत्र आचार्यः कौण्डभट्टः वोधजनकता एव शक्तिरिति प्रतिपादयति। कौण्डभट्टस्य मतानुसारेण बोधजनकतैव हेतुः । अर्थबोधजनकतावच्छेदकत्वेन सङ्केतस्य हेतुत्वस्वीकारापेक्षया बोधजनकताया एव हेतुत्वे लाघवम् । येन वैयाकरणानामपि अभिष्टः सिद्धो भवति ।अतः कौण्डभट्टस्य शास्त्रीयतथ्यमुरोरीकृत्य समीक्षणात्मकेन मार्गेण शोधप्रबन्धोऽयं विकसितः।

**कूटशब्दः** शक्तिः ,पदपदार्थयोः ,वोधजनकता ,सम्बन्धः, ईश्वरेच्छासंकेतः ,

## प्रस्तावना

"शब्देष्वेवाश्रिता शक्तिः विश्वस्यास्य निबन्धनी"[1] - इत्युक्त्यनुसारेण प्रायोगिकशब्दस्य या शत्तिर्विद्यते, सा शक्तिः विश्वस्य निबन्धने जातीयसंहतौ च सहायिका भवति । येन "संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्"[2] इति श्रुतिवचनस्य प्रामाण्यमुपजायते। यदधिकृत्य "वागेव विश्वा भूवनानि यज्ञे" इति श्रुतिवचनं संगच्छते। यतो हि शब्देन एव जगदिदं गतिशीलम् , सर्वमपि ज्ञानं शब्देनैव अवभासते । यदुत्तं हरिणा —

1 . वा1 - .प.-128

2 . ऋ10 -.वे..91.2-4

"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥"

शब्देनैवार्थस्याववोधनत्वात् शब्दस्य शक्तिः सर्वजनग्राह्या। भाष्यकारः तदीये महाभाष्ये शब्दस्य लक्षणद्वयं निरूपितवान्। तद्यथा १ ("येनोच्चारितेन शब्देन सास्नालाङ्गुलककुदखुरविषाणिनां सम्प्रत्यतो भवति स शब्दः"[3] । २ ("प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते[4]। 'प्रतीतपदार्थको लोके ध्वनिः शब्द' – इति द्वितीयलक्षणस्य व्याख्याने उद्योतटीकायां नागेशेनोक्तं यत् लोके व्यवहर्तृषु " पदार्थबोधकत्वेन प्रसिद्धः श्रोत्रेन्द्रियग्राह्यत्वाद् " वर्णरूपध्वनिसमूह एव शब्द[5] इत्यर्थः पुनः 'तपरस्तत्कालस्ये'[6] ति सूत्रे भाष्ये तु ध्वनिस्फोटयोर्भेदः निरूपितः । यदुक्तं तत्र – 'स्फोट शब्दः :ध्वनि:शब्दगुण :'[7] । शब्दस्य अनेकविधा परिभाषा, अर्थस्थापि अनेकविधं प्रतिपादनम्। किन्त्विदं निश्चवचं यत् भाषानिबन्धने उभययोयाथार्थ्यमनस्वीक :ार्यम्। एतदेव तथ्यं प्रतिपाद्य कविकूलगुरुणा महाकविना कालिदासेनोक्तम्–

"वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये
जगतः पितरौ वन्दे पार्वती परमेश्वरौ।।"[8]

वाक् च अर्थश्चेति वागर्थो अत्र वाक् नाम शब्दः । अर्थस्तु तदधिकृत्य बर्त्तते। तत्र अर्थस्य प्रतिप्रत्तिः शब्देनैव विधीयते। यदुक्तं हरिणा 'पदार्थजातयः सर्वाः शब्दाकृतिनिबन्धना:'[9] | यत् तथ्यं स्वीकृत्य 'शब्दार्थौ सहितौ काव्यम्'[10], 'शरीरं तावदिष्टार्थ व्यवच्छिन्ना पदावली काव्यम्'[11], 'काव्यशब्दोऽयं गुणालंकारसंस्कृतयोशब्दार्थ :योर्वर्त्तते ....'[12] ,'शब्दार्थौ काव्यम्'[13] इत्यादीनि काव्यलक्षणानि सङ्गच्छन्ते तथ्यमिदं प्रतिपाद्य उक्तमपि भर्तृहरिणा -'अर्थप्रवृत्तितत्त्वानां शब्दा एवं निबन्धनम्' 'शब्दनैव अर्थापगुढ जायते इति तत् तात्पर्यम्। अत :'शाब्दबोधं प्रति शक्तिग्रहमेव कारणम्[14]' इति धिया शब्दस्य शक्तिसर्व :ैः शास्त्रकारैः स्वीक्रियते।

## विचार

वैयाकरणसिद्धान्तलघुमञ्जूषायां,वैयाकरणसिद्धान्तपरमलघुमञ्जूषायाञ्च ग्रन्थकारेणोक्तं यत् - तद्धर्मामविच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपित वृत्तिविशिष्टज्ञानं हेतुः।-ज्ञाने वृत्तिवैशिष्ट्यञ्च स्वविषयकोद्बुद्धसंस्कारसमानाधिकरण्य - स्वाश्रयपदविषयकत्वोभयसम्बन्धेन इति । अर्थात् घटशब्दश्रवणानन्तरं - यस्याशयो भवति घटत्वावच्छिन्नविषयकशाब्दबोधः सर्वेषां जनानां न भवति, किन्तु घटपदघटत्वावच्छिन्नवाचकमित्याकरक-ं शक्तिज्ञानं येषां वर्तते तेषामेव भवति । गृहीतशक्तिकात् पदात् शाब्दबोधस्य दर्शनात् अगृहीतशक्तिकात् पदात् शाब्दवोधस्यादर्शनात् शाब्दबोधं प्रति शक्तिग्रहस्य कारणता स्वीक्रियते । येन 'गुड' इत्युक्ते गुडपदेन मधुरत्वस्य प्रतीतिर्न भवति । तस्याः शक्तेः आश्रयरूपेण स्फोटरूपं शब्दमेवामनन्ति वैयाकरणाः । शाब्दवोध कारणत्वेन अपेक्षिता एषा वृत्तिः शक्ति लक्षणा व्यञ्जना' चेति भावेन त्रिधा विभज्यते । तत्र 'शक्ति इति क पदार्थ' इति विवेचनावसरे शास्त्रकारेषु वैमत्यं परितक्ष्यते । मुख्यतः विषयेऽस्मिन् वैयाकरणनैयायिकयो-ः विवादः समधिकः । प्राचीननैयायिकाईश्वरेच्छारूपा :ं शक्तिं स्वीकुर्वन्ति । नव्यनैयायिकाः केवलमिच्छामेव शक्तिरिति प्रतिपादयन्ति। तत्रापि वैयाकरणेषु भिन्नं मतं परिलक्ष्यते। वैयाकरणाः शक्तेः आश्रयरूपेण स्फोटरूपं शब्दमेवामनन्ति । नागेशः पदपदार्थयोः सम्बन्धान्तरमेव शक्तिरिति निरूपयति । भर्तृहरिरपि पदपदार्थयोः तादात्मरूपसम्बन्ध एव शक्तिः इति स्वीकरोति । तत्र आचार्यः कौण्डभट्टः वोधजनकता एव शक्तिरिति प्रतिपादयति। भूषणसारकृन्मते बोधजनकतैव शक्तिः । तथा चोक्तं भूषणे –

"इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।
अनादिर्थैश्शब्दानां सम्बन्धो योग्यता तथा ।।"

अर्थात् चक्षुरादीनां स्वविषयेषु चाक्षुषेषु घटादिरूपेषु यथाऽनादिर्योग्यता तदीयचाक्षुषादिकारणता तथा शब्दानामपि अर्थेन सह तद्बोधकारणतैव योग्यता सैव

---

[3] पस्पशा -.भा.म .

[4] तत्रैव .

[5] . मउद्योत -.भा.

[6] . पा1 – .सू ..1.30

[7] 1 – .भा.म ..1.30

[8] 1 – रघुवंशम् ..1

[9] ब्रह्मकाण्डम् .प .वा .

[10] . काव्यालङ्कारः –1.16

[11] . काव्यादर्श - :1.10

[12] . का .सू.– 1.1.1

[13] .काव्यलंकारः -2.1

[14] 1 – .प .वा ,-13

शक्तिरिति तात्पर्यम् । सारल्येण वक्तुं शक्यते यत् चक्षुरादीन्द्रियाणां घटाद्याकारबोधतया स्वविषयेषु घटादिषु योग्यता आकृतिर्दृश्यते सा च अनादिः, न प्रेरणाविषयस्तथैव शब्दानां स्वविषयेष्वर्थेषु सम्बन्धो योग्यता च अनादिरेवेति हि तदाशयः । तथा च इन्द्रियनिष्ठा इन्द्रियविषयघटादिनिरूपिता या कारणता सा तथा अनादिस्तथा सकलशब्दनिष्ठा घटादिनिरूपिता योग्यताऽपि अनादिरिति तात्पर्यम्।

किन्तु एवम्भूतस्वीकारेण सन्देहैकस्योपस्थितिर्भवति यत् - ननु बोधकारणत्वमनादिभूतं शक्ति"" अर्थात् शब्दनिष्ठा बोधकारणता यद्यनादित्वविशिष्टा, तेषां शक्तिर्निर्णयं भवितुं न शक्यते । कारणं आधुनिकशब्दा यथा देवदत्तचैत्रमैत्रास्थि अनादिबोधकारणताया अभावो जायते । यदि देवदत्तादिपदेऽनादित्वविशिष्टा बोधकारणता स्वीक्रियते तदा पित्रादीनां संकेताऽज्ञानेऽपि शाब्दबोधोत्पत्तिः स्यात् । न चाऽनादित्वं शक्तिशरीरे न विशिष्टं किन्तु प्रसिद्धमात्रबोधकम्, तथा देवदत्तादिपदेन संकेतज्ञानाभावे तादृशशक्तेरप्रसिद्धत्वात् शक्तिसत्त्वेऽपि न शाब्दबोधापत्तिरिति वाच्यं लाक्षणिकशब्देऽपि लक्ष्यार्थनिरूपितशक्तित्वापत्तेः। तत्र गंगादिपदे प्रसिद्धबोधकारणत्वसत्त्वात्। अर्थात् यदि आधुनिकसंकेतिदिवदत्तादिपदैः अनादित्वविशिष्ट-बोधकारणतां स्वीकारं भवति तर्हि पित्रादीपदानां संकेताभावेऽपि शाब्दबोधो भविष्यति । परन्तु सिद्धान्तोऽयं शास्त्रविरुद्धत्वात् न स्वीकर्तव्यम् । कारणं यदि सङ्केतज्ञानं विना यदि शक्तिस्वीकारं भवति बोधकारणत्वरूपशक्तेः लक्षणं लाक्षणिकशब्देऽपि अतिव्याप्तिदोषं संग्रहति । यस्य फलस्वरूपे गंगादिपदेऽपि शक्तिद्वारा तटस्य अर्थबोधो भविष्यति । यत्र लक्षणाप्रयोगस्य काऽपि अपेक्षा न तिष्ठति । यद्यपि गंगापदेन तटार्थावबोधः संकेतित न भवति तथापि गंगापदे तटार्थस्य बोधः प्रसिद्धता वर्तते । तर्हि एवं स्वीकारेण बोधकारणत्वविशिष्टरूपशक्तेर्हि लक्षणासिद्धिर्भविष्यति । अत एव शाब्दबोधे संकेतविशिष्टज्ञानस्यापि अपरिहार्यता वर्तते । यत्र सङ्केतः ज्ञानं विना बोधगम्यो न भवितुमर्हति । तर्हि संकेतर्हि शक्तिरेवं स्वीकरणीयम् । विचारोऽयं मीमांसकानां खण्डीभूतो भवति शास्त्रकारेण । कौण्डभट्टमतेन संकेत स्वरूपतः शाब्दबोधं प्रति हेतुरूपेण न सिद्ध्यति । कारणं यदि सङ्केतः स्वभावतः शाब्दबोधं प्रति हेतुर्भवति तर्हि शक्तिज्ञानं विनाऽपि शाब्दबोधो भविष्यति । अर्थात् सङ्केतस्य यदि हेतुत्वं स्वीक्रियते, तर्हि केन रूपेण सङ्केतः स्वरूपेण हेतुः, सामान्यतः ज्ञातरूपेण विशेषरूपेण ज्ञातो वा? इति संशयो जायते । नाद्य -संकेतस्य स्वरूपतो हेतुत्वेऽज्ञातसङ्केतादपि विडौजादिशब्दात् इन्द्रादिरूपार्थबोधप्रसंगः । अर्थात् सामान्यतः ज्ञातः सङ्केतोऽपि शाब्दबोधं प्रति कारणरूपेण न ग्रहणीयः । कारणं सङ्केतः सामान्यतो ज्ञातः सन् हेतुरिति चेत्तदा प्रमेयत्वेन ज्ञातेऽपि सङ्केते शाब्दबोधापत्तिर्जायते अर्थात् यदि सामान्यरूपेणज्ञातसङ्केतद्वारा शाब्दबोधो भवति तर्हि प्रमेयत्व, अभिधेयत्वादिपदेनापि साक्षात् शाब्दबोधो भविष्यति । यथा, घटपटादिवत् सङ्केतोऽपि सामान्यस्वरूपतः प्रमेयपदार्थअनेन प्रमेयत्वज्ञानेन यस्य -: कस्य ज्ञानेसति सङ्केतज्ञानत्वात् घटपटादिपदेषु शाब्दबोधो भवष्यिति । किन्तु वस्तुतः घटस्य कम्बुग्रीवादिमानार्थे सङ्केतस्तिष्ठति ।

पुनश्च यदि सङ्केतस्य विशेषरूपविशिष्टधर्मेण ज्ञातः सन् हेतुश्चेत्तदा सङ्केतत्वेन तज्ज्ञानरहितानामपि व्यवहारिकपदार्थमात्रज्ञानवतां पामराणां बोधजनकत्वमात्रग्रहणे शाब्दबोधोदयात् व्यभिचारस्यात् । : अर्थात् गवादिपदे यद्यपि ईश्वरीयसङ्केतो वर्तते, तथापि तत्र सङ्केतत्वेन तज्ज्ञानशून्यानां लौकिकमीमांसकादीनां तत्तदर्थबोधजनकत्वग्रहवतामेव बोधोदयेन व्यभिचारो जायते । यतः लौकिकाः, मीमांसकानास्तिकाः भवन्ति । : अत एव कौण्डभट्टस्य मतानुसारेण बोधजनकतैव हेतुः । अर्थबोधजनकतावच्छेदकत्वेन सङ्केतस्य हेतुत्वस्वीकारपेक्षया बोधजनकताया एव हेतुत्वे लाघवम् । येन वैयाकरणानामपि अभिष्टः सिद्धो भवति । अर्थात् अर्थधीजनकतानिरूपितविषयतासम्बन्धा अवच्छिन्नाऽवच्छेदकत्वस्यावच्छेदकत्वाऽपेक्षया अर्धधीजनकतात्वेन हेतुताया औचित्येन वैयाकरणेष्टसिद्धिरित्यर्थः । सङ्केतज्ञानस्येद पदमर्थधीजनकताऽवच्छेदकतावदित्याकारकस्याऽर्थधीजनकता अवच्छेदकत्वावच्छिन्नप्रकारताकज्ञानत्वेन हेतुत्वे गौरवात् – इदं पदमर्थधीजनकमिति ज्ञानस्यैवार्थधीजनकतात्वावच्छिन्नप्रकारताकज्ञानत्वेन हेतुत्वमुचितं लाघवादिति भावः ।

किन्तु, इदं “पदमिममर्थं बोधयतुम्” इति पदविशेष्यकार्थविषयकबोधजनकत्वप्रकारकज्ञानस्य पदार्थोपस्थिति प्रति कारणत्वात् यथा बोधजनकता शक्ति : स्वीक्रियते, तद्वद् “अस्माच्छब्दाद् अयमर्थो बोद्धव्य” इति अर्थविशेष्यकशब्दजन्यबोधविषयत्वप्रकारकज्ञानस्यापि पदार्थोपस्थितिं प्रति कारणत्वात्, पदजन्यबोधविषयताया अपि शक्तित्वं कुतो न स्वीक्रियते इति चेदुच्यते - उभयरूपशक्तिस्वीकारेऽप्यस्माकमिष्टापत्तिरेव । न चोभयविधशक्तिस्वीकारे व्यभिचारस्यात् । तथाहि यत्र : पदविशेष्यकबोधजनकतारूपशक्तिज्ञानात् बोधस्तत्र अर्थवशिष्यकबोधविषयतारूपशक्तेरभाव, यत्र चाऽर्थविशेष्यकबोधविषयतारूपशक्तिरूपज्ञानाद् बोधस्तत्र पदविशेष्यकशक्तिज्ञानाभावः ।

एवञ्च कार्यजनकत्वे सति कार्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वरूपं कारणत्वं कुत्रापि शक्तौ न स्यात् बोधरूपकार्यसत्त्वेऽपि उभयोरभावस्य सत्त्वादिति वाच्यम्, अव्यहितोत्तरत्वनिवेशेनाऽदोषात् । तर्हि स्पष्टश्चेदं यत् न च - स्वातन्त्रेणार्थबोधकता शक्तिः नोचिताघटपदे पटत्वावच्छिन्नविषयकबोधजनकत्वज्ञानसम्भवात् । अन्यथा घटपदात् पटत्वावच्छिन्नविषयकबोधशक्तिग्रहस्य आपत्तिर्भविष्यति ।

तर्हि कौण्डभट्टः मीमांसकानां स्वातन्त्रेणार्थबोधकज्ञानं कारणं वाच्यमिति मतं निरसनायोक्तम् "नेदं तज्जनकमिति ग्रहवतो बाधेन पदे परग्रहं जानतोऽपि तद्ग्रहासम्भवात्। अन्यथा भ्रान्तिज्ञानस्यापि भ्रान्तत्वापत्तिरिति । अत एव स्वातन्त्रेण बोधजनकता शक्तिरिति न सम्भवतुमर्हति अन्यथा भ्रान्तिज्ञस्य भ्रान्तित्वापत्तिः भविष्यति । तथा हि पदविशेष्यकशक्तिज्ञानाव्यवहितोत्तरजायमानबोधं पदविशेष्यकशक्तिज्ञानं कारणम् , अर्थविशेष्यकशक्तिज्ञानाव्यवहितोत्तरजायमानबोधं प्रति अर्थविशेष्यकशक्तिज्ञानं कारणमिति विवेकः । तस्मादर्थबोधजनकता शक्तिः सङ्केतस्तु तद्ग्रहकः । अतः संकेताज्ञानाभावे शाब्दबोधोपपत्तिः न स्यात् । तर्हि ग्रन्थकारेण उक्तम् -"इदञ्चार्थधीजनकत्वं पित्रादिसङ्केतज्ञानादेव गृह्यते , अत सदतज्ज्ञानात् पूर्व न बोधः ।

पुनश्च अर्थबोधजनकतापित्रादीनां सङ्केतः ज्ञानाद्धि दृष्टो भवति, तर्हि सङ्केतज्ञानं विना पित्रादीनां शाब्दबोधो नैव भविष्यति । परन्तु अर्थबोधजनकतारूपशक्तिस्वीकारे 'गङ्गाया घोषः' इत्यादिस्थले तटर्थे लाक्षणिकगङ्गापदस्य अनादिबोधकारणतारूपार्थबोधजनकता तटे हि विद्यमाना भवति येन शक्तिद्वारा तटर्थस्य बोधो जायते, किन्तु लक्षणोच्छेदापत्तिर्जायते अर्थात् लक्षणास्थले शक्तेरभावात् तत्र लक्ष्यार्थबोधो न सम्भवतीति शङ्कायां ग्रन्थकारश्चातुर्येण प्रसिद्धाऽप्रसिद्धभेदेन शक्तेर्द्वैविध्ये सिद्धे लक्षणाया अनङ्गीकरणे न कश्चन दोष इति समाधान आमन्दबुद्धिवेद्यात्वं प्रसिद्धात्वम् सहृदयहृदयमात्रवेद्यात्वमप्रसिद्धात्वम् । 'गङ्गायां घोषः' इत्यत्र गङ्गापदस्य प्रवाहरूपेऽर्थे प्रसिद्धा शक्तिः, तीरेऽर्थे चाऽप्रसिद्धाशक्तिरिति शक्त्यैव प्रयोगनिर्वाहे न लक्षणाऽऽपेक्षते। अन्यथा शाब्दबोधे शक्तिजन्योपस्थिते : लक्षणाजन्योपस्थितेश्च कारणत्वे गौरवं स्यात् ।अपि च प्रत्येकं व्यभिचारवारणाय शक्तिज्ञानाव्यवहितोत्तरजायमानतदर्थविषयकशाब्दबोधं प्रति शक्तिजन्योपस्थितेः, लक्षणाज्ञानाव्यवहृतोत्तरजायमानतदर्थविषयकबोधे लक्षणाजन्योपस्थितेश्च कारणत्वमिति महद् गौरवम् ।

न च लक्षणाऽङ्गीकर्त्तृमतेऽपि पदोपस्थितिर्तिं प्रति शक्तिज्ञानं कारणमथ च लक्षणाज्ञानं कारणमित्येव भेदेन न पदार्थोपस्थितिकारणता, किन्तु शाब्दबोधं प्रति वृत्तिजन्यपदार्थोपस्थितिः कारणम् । पुनश्च पदार्थोपस्थितिं प्रति वृत्तिज्ञानं कारणम् । इत्येवं सामान्यतः कल्पनादेकेनैव कार्यकारणभावेन गौर न वाच्यम् शक्तिलक्षणान्यतरत्वस्य शाब्दबोधपदार्थोपस्थित्यनुकूलपदार्थसम्बन्धत्वस्य वा वृत्तित्व कारणतावच्छेदकत्वे गौरवस्य दुर्वारत्वादिति । अत एव बोधजनकत्वमेव शक्तिरिति संसाधितम् । एवम्भावेन विस्तरेण शक्तिस्वरूपविषये यथार्थताऽऽलोचना वर्तते कौण्डभट्टविरचिते बैयाकरणभूषणसारे ।

## सहायक ग्रन्थसूची


1. वैयाकरणभूषणसारः, दर्पणप्रभासमेतः-, चौखम्बा-अफिस-सीरीज-संस्कृत, वारासी, १९६९
2. वैयाकरणसिद्धान्तकौमुदी, मोतीलाल-बनारसी-दास, दिल्ली, २०००
3. वैयाकरणसिद्धान्तलघुमञ्जूषा, कुञ्चिका-सीरीज-संस्कृत-कलासम्वलिता चौखम्वा, वाराणसी, १९८५
4. व्याकरणदर्शनेर इतिहास, गुरुपदहालदार, कोलकाता १३५० वङ्गाव्दः।
5. शब्दशक्तिप्रकाशिका, चौखम्वासीरीज-संस्कृत-, वाराणसी, १९३५
6. प्रकरणपञ्चिका, शालिकनाथ, वेनारस हिन्दु युनिभर्सिटि, वाराणसी, १९६१
7. प्रौढ़मनोरमा, शब्दरत्नभैरवी भावप्रकाश टीका - सम्वलिता, चौखम्वासीरीज-संस्कृत-, वाराणसी।
8. महाभाष्यम्दधिरामशर्मा .प ., चौखम्वा सुरभारती प्रकाशनम्, वाराणसी, १९८८
9. मानमेयेदय, श्रीदीननाथ त्रिपाठिनवर्तीर्थ, संस्कृत कलेज, कोलकाता, १९९०
10. वाक्यपदीयम्, सम्पूर्णनन्द संस्कृत विश्वविद्यालय, वाराणसी, १९९८
11. न्यायदर्शनम्, श्रीयुक्तफणिभूषणतर्कबागीशः, पश्चिमवङ्गपर्षद्-पुस्तक-राजक-, कोलकाता, १९८३

12. न्यायसिद्धान्तमुक्तावली, किरणबलीटीकोपेता, पसंस्कृत संस्थानम्-वल्लभाचार्य्यः चौखम्वा-श्रीकृष्ण., वाराणसी, वि२०६३ सं.
13. अष्टाध्यायी, डतपनशङ्करभट्टाचार्य ., संस्कृत-बुक-डिपो, कोलकाता, २००४
14. आख्यातवाद,: प्रवालकुमार सेन, संस्कृतपुस्तक भान्डार, कोलकाता, १९७९
15. काशिका, डजयशङ्करलालत्रिपाठी ., ड . सुधाकरमालवीय, ताराबुक् एजेन्सी-, वाराणसी, १९८६(
16. तत्त्वचिन्तामणिः. कामाख्यानाथ तर्कवागीश , : चौखम्वा संस्कृत प्रतिष्ठानम्, दिल्ली, १९९०
17. न्यायदर्शनम् गौतमप्रणीतं वात्स्यायनभाष्यसहितम्, चौखम्वा संस्कृततसीरीज वाराणसी।